**सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयः, डोहगी**

**संस्कृतभारती, हिमाचलप्रदेशः (न्यासः)**

**इत्यनयोः संयुक्ततत्त्वावधाने समायोजितानां सम्भाषणशिबिराणां**

# प्रतिवेदनम्

**दिनाङ्कः – 20.08.2024 आरभ्य 30.08.2024 पर्यन्तम्**

संस्कृतसप्ताहावसरे प्रतिवर्षमिव अस्मिन् वर्षेऽपि महाविद्यालये प्रविष्टानां नवीनच्छात्राणां संस्कृतसम्भाषणे दार्ढ्यसम्पादनाय अन्येषां च छात्राणां भाषानैपुण्यसम्पादनाय च महाविद्यालये प्रतिकक्षमपि आहत्य 06 सम्भाषणशिबिराणि सञ्चालितानि। एतेषु शिबिरेषु प्रशिक्षितः महाविद्यालयस्य प्रत्येकमपि छात्रः संस्कृतसम्भाषणे दक्षः सन् समाजे अपि संस्कृतस्य प्रचारार्थं सन्नद्धः स्यात् इत्येतदर्थं महाविद्यालयस्य प्रत्येकमपि कक्ष्यायां सम्भाषणशिबिराणि सञ्चालितानि। एतेषां शिबिराणां संयोजनं महाविद्यालयस्य आचार्येण डा. मुकेशकुमारेण कृतम्।

एतेषां शिबिराणां सञ्चालनार्थं संस्कृतभारतीपक्षतः त्रयः विस्तारकाः श्रीमान् अनिलकुमारः, सुश्री नेहा शर्मा, श्री कर्ण शर्मा च विशेषरूपेण समाहूताः आसन्। एवमेव महाविद्यालयस्य प्रशिक्षिताः अक्षितादयः छात्राः अपि विविधकक्षासु सम्भाषणशिबिराणि चालिवन्तः। एतेषां शिबिराणां विवरणम् क्रमशः अत्र प्रस्तूयते।

- दिनाङ्कः - 20.08.2024 आरभ्य 30.08.2024 पर्यन्तम्
- समयः - अपराह्णे 2.00 वादनात् 4.00 वादनं यावत्
- संख्या - 315 (आहत्य)

**शिबिरसञ्चालनक्रमः**

| शिबिरम् | कक्षा | शिक्षकः | सहशिक्षकः | व्यवस्थाप्रमुखः |
|---|---|---|---|---|
| प्रथमशिबिरम् | प्राक्शास्त्री I-II | पलक शर्मा | समीर कुमारः | डा. हरेकृष्णझा |
| द्वितीयशिबिरम् | शास्त्री - I (प्रथमगणः) | अक्षित शर्मा | नेहा देवी (प्रा.2) | डा. राजिन्द्रकुमारशर्मा |
| तृतीयशिबिरम् | शास्त्री - II (प्रथमगणः) | कविता ठाकुर | श्वेता देवी, वैष्णवी | डा. प्रीतमसिंहः |
| चतुर्थशिबिरम् | शास्त्री - II (द्वितीयगणः) | कर्ण शर्मा | अर्चना, आदित्यः | श्रीमती सन्ध्या देवी |
| पञ्चमशिबिरम् | शास्त्री- III (प्रथमगणः) | नेहा कुमारी | सोनिया | डा. केदारदत्तपुरोहितः |
| षष्ठशिबिरम् | शास्त्री -III आ.I, आ.II (द्वितीयगणः) | डा. अरुणा, वन्दना | साहिलः | डा. रविदत्तशर्मा |

30.08.2024 दिनाङ्के एतेषां शिबिराणाम् सम्पूर्तिसत्रं सुसम्पन्नम्। सम्पूर्तिसत्रस्यास्य अध्यक्षतां व्याकरणविभागस्य वरिष्ठः आचार्यः डा. केदारदत्तपुरोहितः अकरोत्। कार्यक्रमस्य सञ्चालनं आचार्यप्रथमवर्षस्य छात्रा वन्दना शास्त्रिद्वितीयवर्षस्य च छात्रः अक्षित शर्मा अकरोत्। कार्यक्रमे समूहनृत्य, समूहगीतम्, अनुभवकथनम्, अभिनयगीतम्, नाटकं च प्रस्तुतवन्तः।

अस्मिन् अवसरे मुख्यातिथयः अध्यक्षाश्च शिबिरचालकानां संस्कृतभारतीविस्तारकानां दैनन्दिनीप्रदानेन महाविद्यालयस्य प्रशिक्षितछात्राणां शिबिरसञ्चालकानां च लेखनीप्रदानेन सम्माननम् अपि कृतवन्तः। कार्यक्रमान्ते शिबिरसंयोजकः डा. मुकेशकुमारः सर्वेषां धन्यवादज्ञापनम् अकरोत्।

## चित्रमालिका
























डा. मुकेशकुमारः
(सम्भाषणशिबिरसंयोजकः)

डा.लालसिंहपठानिया
(प्राचार्यः प्र.)